ॐ

# स्वस्ति-वाचनम् – गुरुवन्दनम्

श्री काञ्ची कामकोटी पीठाधिपति जगद्गुरु
श्री शंकराचार्य श्री चरणयोः प्रणामाः ।
श्री गुरुभ्यो नमः ।
श्री महात्रिपुरसुन्दरी समेत श्री चन्द्रमौलीश्वराय नमः ।

स्वस्ति | श्रीमदखिल | भूमण्डलालंकार|त्रयस्त्रिंशत्कोटि | देवतासेवित|श्रीकामाक्षीदेवीसनाथ | श्रीमदेकाम्रनाथ श्रीमहादेवीसनाथ श्रीहस्तिगिरिनाथ|साक्षात्कार|परमाधिष्ठान|सत्यव्रतनामांकित|काञ्ची दिव्यक्षेत्रे | शारदामठसुस्थितानां | अतुलितसुधारसमाधुर्य | कमलासनकामिनीधम्मिल्लसम्फुल्लमल्लिका मालिकानिष्यन्द मकरन्दझरी|सौवस्तिक|वाङ्निगुम्भविजृंभणानन्द|तुन्दिलित|मनीषिमण्डलानां | अनवरताद्वैतविद्याविनोदरसिकानां | निरन्तरालंकृत|शान्तिदान्तिभूम्नां | सकलभुवनचक्रप्रतिष्ठापक | श्रीचक्रप्रतिष्ठाविख्यातयशोऽलंकृतानां | निखिलपाषण्डषण्ड|कण्टकोत्पाटनेन|विशदीकृतवेदवेदान्तमार्ग | षण्मतप्रतिष्ठापकाचार्याणां | श्रीमत्परमहंसपरिव्राजकाचार्यवर्य | श्रीजगद्गुरुश्रीमच्छंकरभगवत्पादाचार्याणां अधिष्ठाने | सिंहासनाभिषिक्त | श्रीमच्छन्द्रशेखरेन्द्रसरस्वती संयमीन्द्राणां | अन्तेवासिवर्य | श्रीमज्जयेन्द्र सरस्वती श्रीपादानां | तदन्तेवासिवर्य | श्रीमच्छङ्कर विजयेन्द्र सरस्वती श्रीपादानां च |चरणनलिनयोः| सप्रश्रयं | साञ्जलिबद्धं च नमस्कुर्मः ।